
# अथगणेशसंकष्टचतुर्थीव्रतकथाप्रारंभः

CC-0 Pulwama Collection. Digitized by eGangotri



श्रीगणेशायनमः॥ ॥अथद्वादशमासगणेशव्रतक[illegible]लेख्यते ॥ ॥
ऋषयऊचुः॥ ॥दारिद्र्यशोककुष्ठाद्यैःपीडितैश्चैववैरिभिः॥राज्यभ्रष्टैर्नृपैःस
र्वैःक्रियतांक्लेशभाजनैः॥१॥धनहीनैर्जनैःस्कंदसर्वोपद्रवपीडितैः॥विद्यापुत्र
गृहभ्रष्टैरोगयुक्तैःशिवार्थिभिः॥२॥किंकर्तव्यंवदोपायंपुनःक्षेमप्रसिद्धये॥ ॥
स्कंदउवाच॥ ॥शृणुध्वंमुनयःसर्वेयत्पृष्टोहंव्रतंशुभम्॥३॥येनव्रतेनसंकष्टा
त्तरंतिभुविमानवाः॥व्रतराजंमहापुण्यंनराणांसिद्धिदायकम्॥४॥नारीणांच
विशेषेणपुत्रसौभाग्यवर्धनम्॥यत्कृतंपांडुपुत्रेणधर्मराजेन[illegible]मता॥५॥रा
ज्यभ्रष्टेनचारण्येभ्रातृभिश्चनरोत्तमैः॥अरण्येवर्तमानस्यकृष्णेनकथितंपुरा
॥आत्मकष्टविनाशायतच्छृणुध्वंद्विजोत्तमाः॥६॥ ॥युधिष्ठिरउवाच॥ ॥

CC-0 Pulwama Collection. Digitized by eGangotri

ग.व्र केनोपायेनदेवेशसंकष्टादुद्धराम्यहम्।। मुक्तोभवेयंतद्ब्रूहिसर्वज्ञोसिगदाधर ।। कथा.
१ ।।७।। ।।स्कंदउवाच।। ।।कृतप्रश्नोहृषीकेशःप्रोवाचेदंयुधिष्ठिरम्।।प्रय श्री:
तंप्रांजलिंधीरंप्रार्थयंतंमुहुर्मुहुः।।८।। ।।श्रीकृष्णउवाच।। ।।अस्तिगु
ह्यतमंराजन्व्रतंसर्वार्थदायकम्।। यन्मयाकथितंपूर्वंनकस्यापिनरोत्तम।।९
।।पुराकृतयुगेराजन्हिमाचलसुताशुभा।। तपस्तेपेवनेभूरिनलब्धः शंकरःपतिः
।।१०।।तदासस्मारहेरंबंगणेशं हिमजातुसा।।तत्क्षणादागतं दृष्ट्वागणेशंपरिपृ
च्छति।।११।।तपस्तप्तंमहाघोरंदुर्लभंरोमहर्षणम्।।नप्राप्तः पार्वतीकांतोगिरी
शोममवल्लभः।।१२।।संकष्टनाशनंदिव्यंव्रतंनारदउक्तवान्।। त्वदीयंतद्व्रतंतत्त्वं
कथयस्वपुरातनम्।।१३।।तच्छ्रुत्वापार्वतीवाक्यंसंकष्टनाशनंशुभम्।।प्रीत्या

CC-0 Pulwama Collection. Digitized by eGangotri

मरणाद्यत्र कैवल्यं देवानामपि दुर्लभम्॥ कंबलाश्वतरौ नागौ यमुनादक्षिणे तटे॥ ४१॥ तत्र स्नात्वा च पीत्वा च सर्वपापैः प्रमुच्यते॥ मूलटंकेश्वरं दृष्ट्वा शिवस्थानमनुत्तमम्॥ ४२॥ नरस्तारयते पूर्वान्दशातीतान्दशापरान्॥ अश्वमेधस्य यज्ञस्य पूजनाल्लभते फलं॥ ४३॥ वेणीजलाभिषेकेण पंचामृतघटोद्भवं॥ सहस्रगुणितं पुण्यं लभते नात्र संशयः॥ पुष्पमात्रप्रदानेन शतसौवर्णिकं फलं॥ विल्वपत्रप्रदानेन अनंतगुणितं भवेत्॥ ४५॥ गंगायाः पूर्वभागे तु प्रतिष्ठाने नृपोत्तम॥ सामुद्राख्यो महाकूपस्त्रिषु लोकेषु विश्रुतः॥ ४६॥ ब्रह्मचारी जितक्रोधस्त्रिरात्रं तत्र तिष्ठति॥ यदि सत्यो विशुद्धात्मा सोऽश्वमेधफलं भवेत्॥ ४७॥ उत्तरेण प्रतिष्ठानात् भागीरथ्यास्तु पूर्वतः॥ हंसप्रपतनं नाम त्रिषु लोकेषु विश्रुतं॥ ४८॥ अश्वमेधफलं तत्र स्नानमात्रस्य भारत॥ हंसवन्निर्मलो लोके जायते नात्र संशयः॥ ४९॥ यावच्चंद्रश्च सूर्यश्च तावत्स्वर्गे महीयते॥ उर्वशीपुलिने रम्ये विपुले हंसपांडुरे॥ ५०॥ परित्यजति यः प्राणांस्तस्य भाग्यवशात्तु॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च॥ सेवते पितृभिः सार्धं स्वर्गलोके नराधिप॥ उर्वशीं तं सदा पश्येद्देवलोके नराधिप॥ ५२॥ पूज्यते तत्र सततमृषिगंधर्वकिन्नरैः॥ ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः॥ ५३॥ उर्वशीसदृशीनां तु कन्यानां लभते शतं॥ मध्ये नारीसहस्राणां बहूनां च पतिर्भवेत्॥ ५४॥ दशग्रामसहस्राणां भोक्ता भवति भूमिपः॥ कांचीनूपुरशब्देन सुप्तोऽसौ प्रतिबुध्यते॥ ५५॥ भुक्त्वा तु विपुलान्भोगान्तत्तीर्थं लभते पुनः॥ शुक्लांबरधरो नित्यं नियतः संयतेंद्रियः॥ ५६॥ एक





कालं तु भुंजानो मासं भोगावतीं वसेत्॥ सुवर्णालंकृतानां तु नारीणां लभते शतं॥ ५७॥ पृथिव्यां सागरांतायां महाभोगसमन्वितः॥ धनधान्यसमायुक्तो दाता भवति धार्मिकः॥ ५८॥ भुक्त्वा तु विपुलान्भोगान्तत्तीर्थं लभते पुनः॥ अथ संध्यावटे रम्ये ब्रह्मचारी जितेंद्रियः॥ ५९॥ उपासीत शुचिः संध्यां ब्रह्मलोकमवाप्नुयात्॥ कोटितीर्थं समासाद्य यस्तु प्राणान्परित्यजेत्॥ ६०॥ कोटिवर्षसहस्राणि स्वर्गलोके महीयते॥ ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः॥ ६१॥ सुवर्णमणिमुक्ताढ्ये कुले जायेत रूपवान्॥ ततो भोगावतीं गत्वा वासुकेरुत्तरेण तु॥ अश्वमेधाभिधं तीर्थं तत्र पुण्यपरो भवेत्॥ ६२॥ स्नात्वाभिषेकं तु नरः सोऽश्वमेधफलं भवेत्॥ ६३॥ धनाढ्यो रूपवान्दक्षो दाता भवति धार्मिकः॥ चतुर्वेदेषु यत्पुण्यं सत्यवादिषु यत्फलं॥ ६४॥ अहिंसकस्य यो धर्मो गमनादेव तत्फलं॥ कुरुक्षेत्रसमा गंगा यत्र कुत्रावगाहिता॥ ६५॥ कुरुक्षेत्राद्दशगुणा यत्र विंध्येन संगता॥ ततो दशगुणा प्रोक्ता काश्यां चोत्तरवाहिनी॥ ततः सा वै शतगुणा गंगासागरसंगता॥ ततः सहस्रगुणिता कालिंद्या सहसंगता॥ ६७॥ प्रयागे सानंतगुणा गंगा पश्चिमवाहिनी॥ सा राजन्दर्शनादेव महापातकक्षयावहा॥ ६८॥ महाभागे न सा लभ्या मकरस्थे रवौ भवेत्॥ सूर्ये मकरराशिस्थे माघे मासेतिदुर्लभा॥ ६९॥ तत्र स्नानेन दानेन जपहोमार्चनादिना॥ अनंतमक्षयं पुण्यं फलं भवति नान्यथा॥ ७०॥ तिलद्रोणयुतं तत्र तिलपात्रं घृतान्वितं॥ मधुना चैव संयुक्तं स्वर्णदक्षिणया सह॥ ७१॥ विप्राय वेदविदुषे श्रोत्रियाय कुटुंबिने॥ पूजयित्वा प्रदद्याद्यस्तस्य पुण्यमनंतकं॥ ७२॥ कल्पक्षयेऽपि तस्यांतो न भ

CC-0 Pulwama Collection. Digitized by eGangotri

वेसुरपकर्मणः॥ यत्रगंगामहाभागासिद्धक्षेत्रंततःस्मृतं॥ ७३॥ सर्वतीर्थानितत्रैवनात्रकार्याविचारणा॥ क्षितौतार
यतेमर्त्यान्नागांस्तारयतेप्यधः॥ ७४॥ दिवितारयतेदेवान्तस्मात्त्रिपथगास्मृता॥ यावदस्थीनितिष्ठंतिगंगायांयस्य
देहिनः॥ ७५॥ तावद्युगसहस्राणिस्वर्गलोकेमहीपते॥ तीर्थानांपरमंतीर्थंनदीनांपरमंनदी॥ ७६॥ मोक्षदासर्वभूता
नांमहापातकिनामपि॥ सर्वत्रसुलभागंगात्रिषुस्थानेषुदुर्लभा॥ ७७॥ गंगाद्वारेप्रयागेचगंगासागरसंगमे॥ तत्रस्ना
त्वादिवंयांतियेमृतास्तेऽपुनर्भवाः॥ ७८॥ सर्वेषामेवभूतानांपापोपहतचेतसां॥ गतिमन्वेषमाणानांनास्तिगंगासमाग
तिः ७९॥ पवित्राणांपवित्रंतुमंगलानांतुमंगलं॥ महेश्वरशिरोभ्रष्टासर्वपापहराशुभा॥ ८०॥ इतिश्रीमत्स्यपुराणे
प्रयागमाहात्म्येचतुर्थोऽध्यायः॥ ४॥ श्रीमार्कंडेयउवाच॥ शृणुराजन्प्रवक्ष्यामिमाहात्म्यंपुनरेवतु॥ यच्छ्रुत्वासर्वपा
पेभ्योमुच्यतेनात्रसंशयः॥ १॥ मानसंनामतत्तीर्थंगंगायाउत्तरेतटे॥ त्रिरात्रोपोषितःस्नात्वासर्वाकामानवाप्नुयात्॥ २॥
गोभूहिरण्यदानेनयत्फलंप्राप्नुयान्नरः॥ अकामोवासकामोवागंगायांयोविपद्यते॥ प्रजापत्येवसेल्लोकेब्रह्मायावहसेतस्य
४॥ तेनैवसहंभूपपरंब्रह्माधिगच्छति॥ हंससारसयुक्तेनकिंकिणीजालमालिना॥ ५॥ अप्सरोगणसंयुक्तःशृण्वन्गांधर्वैस्तु
जमं॥ रमतेब्रह्मणोलोकेयःसकामोम्रियेतवै॥ ६॥ ततोभूमिपतिर्भूत्वाराजन्राजाभिवंदितः॥ भोगान्भुक्त्वाचानूभुंजल्पन
स्तत्रैवगच्छति॥ ७॥ तत्रमुक्तस्तनुंभूत्वापरंब्रह्माधिगच्छति॥ गवांशतसहस्रस्यसम्यक्दत्तस्ययत्फलं॥ ८॥ प्रयागेश्वपचाः ८

७ समाश्रिताः॥ ब्रह्मारुद्रश्चविष्णुश्चदिशश्चैवदिगीश्वराः॥ २५॥ साध्याश्चपितरोनासीद्यौनिसरितस्तथा॥ सागराःसं
प्रतिष्ठंतिसनकाद्यामहर्षयः॥ अंगिराःप्रमुखाश्चैवतथाब्रह्मर्षयःपरे॥ कपिलाद्यास्तथासिद्धाःसुपर्णाश्चमरुद्गणाः॥
२७ विद्याधराश्चक्रधराःसर्वाण्यायतनानिच॥ वेणीमाधवरूपेणयत्रास्तेभगवान्हरिः॥ २८॥ शूलटंकेश्वरोरु
रुद्रःस्वयंतिष्ठत्यसौहरः॥ ब्रह्माप्रजापतिर्यत्रचक्रे[illegible]यज्ञाननेकशः॥ २९॥ स्वयंतिष्ठतिलोकेशोलोकानुग्रहकारक
॥ गंगायमुनयोर्मध्येपृथिव्याजघनंस्मृतं॥ ३०॥ प्रयागंराजशार्दूलत्रिषुलोकेषुविश्रुतं॥ ततःपुण्यतमंनास्तित्रिषुलो
केषुभारत॥ ३१॥ श्रवणात्तीर्थराजस्यनामसंकीर्तनादपि॥ मृत्तिकालंभवाद्वापिनरःपापात्प्रमुच्यते॥ ३२॥ तत्राभिषेकं
यःकुर्यात्संगमेसंशितव्रतः॥ तुल्यंफलमवाप्नोतिराजसूयाश्वमेधयोः॥ ३३॥ नवेदवचनात्तातनलोकवचनादपि॥ मतिरु
त्क्रमयातेचप्रयागमरणंप्रति॥ ३४॥ दशतीर्थसहस्राणिषष्टिकोट्यस्तथापराः॥ तेषांसान्निध्यमत्रैवसत
तंकुरुनंदन॥ ३५॥ यागतिर्योगयुक्तस्यसत्त्वस्थस्यमनीषिणः॥ सागतिस्त्यजतःप्राणान्गंगायमुनसंगमे॥ ३६॥
व्यर्थंजीवितमेतेषांप्रयागोयैर्नगम्यते॥ भुंजानाअपिभोगांस्तेस्त्रीपुत्रधनसंयुताः॥ ३७॥ येप्रयागंनसंप्राप्तास्त्रि
षुलोकेषुवंचिताः॥ यैर्दृष्टोवात्विहसंप्राप्ताप्रयागःसुरवल्लभः॥ तेषांदेवसफलंजन्मादीनामपिदेहिनां॥ मुच्यंतेसर्वपा
पेभ्यस्त्वहृष्टैवतुतन्नस्मणात्॥ ३९॥ किंवास्वर्गादिलाभेनपुनरावर्ततेयतः॥ प्रयागदर्शनादेवमुच्यंतेसर्वपातकात्॥ ४०

CC-0 Pulwama Collection. Digitized by eGangotri

मा
५ १९ अनश्नन्नेवतीर्थेशेस्नातः[illegible]भवेन्नरः॥[illegible]णंविना[illegible]याकंचुकोष्णीषवर्जितः॥२०॥तैलाभ्यंगंसमुत्सृ
ज्यब्रह्मचर्येणसंयुतः॥तपसायःसमायुक्तःसतीर्थ[illegible]लभाग्भवेत्॥२१॥स्वार्थस्यरक्षणाच्चैवयथाशक्तिस्वदानतः॥
कीर्तियुक्तोभवेद्यस्तु[illegible]तीर्थेविंदतेफलं॥२२॥पति[illegible]समर्थोपिनादत्तेयःप्रतिग्रहम्॥क्रोधेनरहितःसाधुःसतीर्थफ
लमश्नुते॥२३॥दे[illegible]रायणात्पुंसः[illegible]तिग्रहसमुद्भवः॥दोषोनस्पृशतिस्वोपितस्मात्कुर्याज्जपंसदा॥२४॥एवंयश्चस
मर्थोपिप्रतिग्रहपराङ्मुखः॥सचाप्नोतिफलंसम्य[illegible]प्नोतिचवांछितं॥२५॥सुवर्णमणिमुक्तादिप्रतिग्रहपरोनरः॥
स्वकार्येपितृकार्येवादेवताभ्यर्चनेपिवा॥२६॥वि[illegible]लंतस्यतत्तीर्थंगमनंपापमश्नुते॥अतस्तीर्थेनगृण्हीयात्पुण्येष्वाय
तनेषुच॥२७॥निमित्तेषुचसर्वेषुअप्रमत्तोभवे[illegible]कपिलांपाटलांरम्यांयस्तुधेनुंप्रयच्छति॥२८॥स्वर्णशृंगीं
रौप्यखुरांचैलकंठांपयस्विनी॥रत्न[illegible]कीं ताम्र[illegible]कांस्यदोहांसवत्सकां॥२९॥कौटुंबिकायविप्रायसुशीलायतप
स्विने॥अभ्यर्च्यवासोलंकारैस्तस्यपुण्य[illegible]थमुच्यते॥३०॥धर्मात्मनेवेदविदेश्रोत्रियायचभक्तितः॥त्रिवर्ण्यांतोषये
च्छुत्पादत्तानंतमभीप्सता॥३१॥वासांसिचमहार्घाणि[illegible]यानिविविधानिच॥यावद्रोमाणितस्यांगोःसंतिगात्रेषुसर्व
तः॥३२॥तावद्वर्षसहस्राणिस्वर्गलोकेमहीपते॥(यत्रासौलभतेज[illegible]सांगोस्तत्राभिजायते॥३३॥नपश्यतिसपुरुषा
त्मानरकंचदुःखदं॥स्वर्गेलोकात्प[illegible]प्रोजंबूद्वीपाधिपोभवेत्॥३४॥उत्तरान्सकुरून्प्राप्यमोदतेलक्षमक्षयं॥ ५

अतःकौन्वाशतेनापिदद्यादेकांपयस्विनीं॥३५॥पुत्रान्दारान्सदाभृत्यानेकागौस्तारयेत्सदा॥तस्मात्सर्वेषु
६ दानेषुगौरेकातुविशिष्यते॥३६॥दुर्गमेविषमेघोरेतथापानकसंकटे॥गौरेवरक्षांकुरुतेसत्पात्रेप्रतिपादिताः ३७
कुपात्रायचसादत्तादातारंनरकंव्रजेत्॥मलभ्यतेयत्रपात्रंतत्रसंकल्पपूर्वकं॥३८ पात्रंमनसिसंधायतोयेतोयंविनि
क्षिपेत्॥शालिग्रामसमीपेवासंकल्पंयविधायच॥३९॥ततश्चतद्गृहंगत्वाददद्यात्तस्मैद्विजायतां॥एवंकृतेभवेत्त
त्सफलंसंपूर्णंहेनवे॥४०॥नदोषभा[illegible]क्प्रतिग्राही[illegible]नविधिनातथा॥दातापतिगृहीताचतत्क्षवालंभनात्सदा ४१
तरंतिदुस्तरंचैवघोरंदुरितसागरं॥४२॥इतिश्रीम[illegible]पुराणेप्रयागमाहात्म्येतृतीयोध्यायः॥३॥युधिष्ठिरउवाच॥
यथायथाप्रयागस्यमहिमानंशृणोम्यहं॥तथातथाभवत्येवमनसोभावमुद्भूता॥१॥भगवन्केनविधिनागच्छेत्ती
र्थेनरःसुधीः॥विशेषात्तीर्थराजानंप्रयागंप्रतितद्वद॥२॥मार्कण्डेयउवाच॥कथयिष्यामितेवत्सतीर्थयात्राविधिक्रमं
यथोक्तमृषिभिःसर्वंविचार्यचसुनिश्चितं॥३॥प्रस्थानात्पूर्वदिवसेक्षौरंचैवउपोषणं॥घृतप्रधानकंश्राद्धंविधायनृपस
त्तम॥४॥प्रथमावसतिंप्राप्यघृतशेषेणपारयेत्॥[illegible]त्वाप्रतिदिनंगच्छेद्धृष्टचारीजितेंद्रियः॥५॥पादचारेणवसतिंपाद
त्राणविवर्जितः॥कंचुकोष्णीषरहितोयानारोहणवर्जितः॥६॥अनश्नन्नेववसतिंयावन्नित्यंहरिंस्मरेत्॥आरोहणंगवांय
त्वाद्वर्जयेन्नरकावहं॥७॥दारुणोहिगवांक्रोधस्तेनयानेनयोव्रजेत्॥सलिलंनचगृह्णंतिपितरस्तस्यदेहिनः॥८॥ ये

CC-0 Pulwama Collection. Digitized by eGangotri

मा
६

अथ योऽहंकृतो योगे यानमारुह्य गच्छति ॥ निष्फलं तस्य यात्रा या गत तस्माद्विवर्जयेत् ॥ ९ ॥ यानमर्द्धं फलं हंति तदर्धं धी-
मुपानहौ ॥ अशक्तस्तु यथाशक्त्या गच्छेद्भक्त्या हरिं स्मरन् ॥ १० ॥ तथापि तीर्थयात्राया फलं भवति नान्यथा ॥ यस्तु पुत्रा-
स्तथा दारान्त्वा त्वा चैवात्मना सह ॥ ११ ॥ आत्मवत्त्वा यथाशक्ति ब्राह्मणेभ्यः प्रदापयेत् ॥ यत्र यत्र च जायेत तत्र सर्वैः समी-
वृतः ॥ १२ ॥ राजते रूपसंपन्नैः स्वयं च गुणवान्भवेत् ॥ अनेकभोगसंयुक्तः संवसेदुत्तरान्कुरून् ॥ १३ ॥ गंगायमुनयोर्मध्ये
यस्तु कन्यां प्रयच्छति ॥ आर्षेणैव विधानेन यथाविभवसंभवात् ॥ न स पश्यति तं घोरं नरकं तत्प्रभावतः ॥ उत्तरान्स कुरून्प्रा-
प्य मोदते कालमक्षयं ॥ १५ ॥ पुत्रान्दारांश्च लभते धार्मिकान्रूपसंयुतान् ॥ तत्र दानं प्रदातव्यं यथाविभवसारतः ॥ १६ ॥
तीर्थं प्राप्य सकृत्स्नात्वा मुंडनं कारयेत्ततः ॥ देवान्पितॄंस्तर्पयित्वा तीर्थदेवान्समर्चयेत् ॥ १७ ॥ उपोषितस्तीर्थं प्राप्य श्राद्धं कु-
र्याद्विधानतः ॥ द्विजान्संस्नाप्य ततः प्राप्य [illegible] भुंजीत वाग्यतः ॥ १८ ॥ पौर्णमासे सह महावाहो दीनानाथांश्च तर्पयेत् ॥ तेन पुण्यप्रभा-
वेन यावदाभूतसंप्लवं ॥ १९ ॥ स्वर्गे वसति धर्मात्मा विमानेनार्कवर्चसा ॥ क्रीडतेऽप्सरसां मध्ये देवानां क्रीडने सुच ॥ वटमूलं
समासाद्य यस्तु प्राणान्परित्यजेत् ॥ सर्वान्लोकानतिक्रम्य शिवलोकं स गच्छति ॥ २१ ॥ यत्र ते द्वादशादित्यास्तपंते रुद्रमा-
श्रिताः ॥ निर्दहंति जगत्सर्वं वटमूलं न दह्यते ॥ २२ ॥ नष्टे चंद्रार्कपवने यदा चैकार्णवं जगत् ॥ तदा स्वपिति तत्रस्थो विष्णुर्वटपुटे स-
दा ॥ २३ ॥ देवदानवगंधर्वा ऋषयः सिद्धचारणाः ॥ सदा सेवंति तत्तीर्थं गंगायमुनसंगमे ॥ २४ ॥ सर्वदेवाश्च ऋषयो वेणीजल

कांचनवर्णैर्विमानैः सूर्यवर्चसैः ॥ [illegible] प्सरसां मध्ये [illegible] स्वर्गे संमोदते चिरं ॥ ५ ॥ ईप्सितान्लभते कामानेवं हि मु-
नयो विदुः ॥ सर्वरत्नमयैर्दिव्यैर्नानारत्नसमाकुलैः ॥ [illegible] गनासमा [illegible] र्णैर्मोदते सुखसंपन्नैः ॥ गीतवादित्रनिर्घोषैः
प्रसुप्तः प्रतिबुध्यते ॥ ६ ॥ यावन्न स्मरते जन्म तावत्स्वर्गे [illegible] यते ॥ ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः ॥ ७ ॥ हि-
रण्यरत्नसंपूर्णे प्रसिद्धे जायते कुले ॥ त [illegible] स्मरते तीर्थं [illegible] गजन्म भवभावनः ॥ [illegible] ॥ पुनर्गच्छति तत्तीर्थं प्रयागं ना [illegible] संश-
यः ॥ तत्र प्राणान्परित्यज्य ब्रह्मलोकं [illegible] च्छति ॥ [illegible] णा सह संप्राप्य प्रलये [illegible] रात्मकं ॥ तदा [illegible] तां वेल भते य द्द-
त्वा न पुनर्भवः ॥ १० ॥ यश्च प्रयागवासी [illegible] गत्वान्य [illegible] र्थैन ॥ स्वकर्मनिरतो धीरः शुद्धबुद्धिर्जितेंद्रियः ॥ ११ ॥ तान्लोका-
न्स [illegible] तिपत्र गत्वा न शोचति ॥ सर्वकामफला [illegible] मही यत्र हिरण्मयी ॥ १२ ॥ ऋषयो मुनयः सिद्धास्तत्र लोके स ग-
च्छति ॥ स्त्रीसहस्राकुले रम्ये मंदाकिन्यास्तटे शुभे ॥ [illegible] मोदते ऋषिभिः सार्धं सुकृतेनैव कर्मणा ॥ देशस्थो यदि वारण्ये
विदेशे यदि वा गृहे ॥ १४ ॥ श्रीतीर्थराज [illegible] स्मृत्य यस्तु प्राणांस्त्यजेत ॥ [illegible] लोकमवाप्नोति सुकृतेनैव कर्मणा ॥ १५ ॥
तीर्थराजं समासाद्य [illegible] र्यात्प्रतिग्रहं ॥ यस्य हस्तौ [illegible] चमनश्चैव सुसंयतं ॥ १६ ॥ विद्या तपश्च कीर्तिश्च स तीर्थफ-
लमश्नुते ॥ प्रतिग्रहान्निवृत्तो यः संयतः [illegible] भवेन्नरः ॥ [illegible] जीवेत्सुरहितो देशे यदि पूते न्यसेत्पदं ॥ स एवं नियमः प्रोक्तस्त-
त्तीर्थार्थे वेदिभिः ॥ १९ ॥ गाढ [illegible] स्तत्र यामं [illegible] स्थितो [illegible] वेत ॥ एकदा [illegible] उपवासाद्येर्युक्तो भक्ष्यविवर्जितः ॥

CC-0 Pulwama Collection. Digitized by eGangotri

विमुक्तः सर्वपातकैः ॥२॥ मार्कंडेय उवाच ॥ शृणु राजन् प्रयागे तु अनाशक फलं महत् ॥ प्राप्नोति पुरुषो धीमान् श्र
द्धानो जितेंद्रियः ॥३॥ यावंति दिवि वै लोकास्तेषु सर्वेषु वै चिरं ॥ भुक्त्वा नानाविधान् भोगान् ततः पृथ्वीपतिर्भवेत् ॥४॥
समृद्धी पाधिपत्यं तु प्राप्य रत्नधनैर्युतः ॥ पूर्ववासनया युक्तस्तीर्थराजनिषेवकः ॥५॥ तत्रैव निधनं प्राप्य वासुदेवपरायणः
वैकुंठमेव प्राप्नोति संनिधिं प्राप्य वै हरिं ॥६॥ पुनरावृत्तिरहितस्त्वनाशक फलं महत् ॥ एवं जानीहि सुमते तीर्थराजं प्रति ध्रु
वं ॥७॥ अहीनांगो ह्यरोगः पंचेंद्रियसमन्वितः ॥ अश्वमेध फलं तस्य गच्छतस्तु पदे पदे ॥८॥ कुलानि तारयेद्राजन् दश पू
र्वान् दशापरान् ॥ मुच्यते सर्वपापेभ्यो गच्छेच्च परमं पदं ॥९॥ युधिष्ठिर उवाच ॥ भाग्यं महन्मे भवतो मुखाद्यच्छृणोमि तीर्थश
कथां विदिनां ॥ एच्छामि किंचित्करुणाकरं त्वां भूयोपि पुण्यं हृद्वचनामृतं च ॥११॥ प्रयागगमनेनैवाश्वमेधफलमीरितं
तत्कथं स स्यकार्येपि स्यात्पुण्यं तादृशं विभो ॥१२॥ मार्कंडेय उवाच ॥ शृणु राजन् महागुह्यं सर्वपापप्रणाशनम् ॥ प्रयागे मासमात्रं
तु यः स्नायान्नियतेंद्रियः ॥१२॥ मुच्यते सर्वपापेभ्यो यथाह स्वयंभुवा ॥ शुचिस्तु प्रयतो भूत्वाहिंसकश्श्रद्धयान्वितः ॥१३॥ ति
लाशी वाहविश्वा ॥ शी भूमिशायी हरौरतः ॥ स गच्छेत्परमं स्थानं यत्र गत्वा न शोचति ॥१४॥ विश्रंभघातको यस्तु प्रयागं प्राप्य
पापकृत् ॥ भिक्षाशी च त्रिषवणं गंगास्नानपरायणः ॥१५॥ त्रिभिर्मासैः प्रमुच्येत ब्राह्मणानामनुग्रहात् ॥ अज्ञानादपि यस्सेह
तीर्थयात्रादिकं भवेत् ॥१६॥ सर्वकामसमृद्धस्तु स्वर्गलोके महीयते ॥ स्थानं च लभते नित्यं धनधान्यसमाकुलं ॥१७॥ एवं ज्ञा ९

नेन संपूर्णः सदा भवति भोगवान् ॥ तारितः पितरस्तेन नरकात्प्रपितामहाः ॥१८॥ धर्मानुसारितत्त्वज्ञ पृच्छतस्ते पुनः पुनः ॥
गुह्यं वै प्रोच्यते सर्वं त्वत्प्रीत्यर्थं मयाधुना ॥१९॥ शृणु राजन् महाप्राज्ञ यदुक्तं पद्मयोनिना ॥ ऋषीणां सन्निधौ पूर्वं कथ्यमानं मया
श्रुतं ॥२०॥ पंचयोजनविस्तीर्णं प्रयागस्य तु मंडलं ॥ प्रविष्टमात्रे तद्भूमावश्वमेधः पदे पदे ॥२१॥ अतीतान्पुरुषान्सप्त आपमादि च
तुर्दश ॥ नरस्तारते पूर्वान् यस्तु प्राणान्परित्यजेत् ॥२२॥ एवं ज्ञात्वा तु राजेन्द्र सदा श्रद्धापरो भवेत् ॥ अश्रद्दधानः पुरुषः पापोपह
तचेतनः ॥२३॥ न प्राप्नोति परं स्थानं प्रयागं देवरक्षितं ॥ युधिष्ठिर उवा ॥ स्नेहाद्वा द्रव्यलोभाद्वा यो वा कामवशं गतः ॥२४॥ कथं या
त्राफलं तेषां [illegible]र्थस्यापि फलं कथं ॥ विक्रेतुः सर्ववस्तूनां कार्याकार्यमजानतः ॥२५॥ प्रयागे का गतिस्तस्य चैतद्ब्रूहि महामुने ॥ मा
र्कंडेय [illegible]च ॥ अत्र वंधेन केनापि प्रयागं योधिगच्छति ॥२६॥ तुर्यांशं सोपि लभते यात्रायामानवः फलं ॥ कृत्वा पापानि बहुशी
विक[illegible]जितेंद्रियः ॥२७॥ प्रयागं प्रविशन्नेव निष्पापो जायते क्षणात् ॥ अत्रैवोदाहरंतीममितिहासं पुरातनं ॥२८॥ पश्चिमस्यो
दधेः कू[illegible]प[illegible]हेति श्रुतः ॥ वणिक् बहुधनः सौम्यो द्रव्योपायविशारदः ॥२९॥ सांयात्रिकेन विधिना क्रयविक्रयकारकः ॥ रत्ना
निनानाद्रि[illegible]योः समानीय महामतिः ॥३०॥ संचयं परमं चक्रे नानोपायैर्विचक्षणाः ॥ वस्त्राणि धनरत्नानि गृहे यावंति तस्य हि ॥३१॥ सु
[illegible]वपितावंति भविष्यं ति न वेति वै ॥ दृष्ट्वा संदह्यते लोको निश्चयं नाधिगच्छति ॥३२॥ ज्ञातीनामाश्रयः सोति धर्मात्मा संयतेंद्रियः
[illegible]दानानि यावंति स[illegible]रमहामतिः ॥३३॥ वाग्मी दाता च शास्त्री च साधूनामाश्रयप्रदः ॥ ईदृशस्य पितस्यैव पुत्रचिंतापरः

CC-0 Pulwama Collection. Digitized by eGangotri

प्र॰म॰ [illegible] वत्॥३४॥ [illegible] खैनैवजायतेगृहमेधजं॥ नजायतेतस्यनिद्राव्याकुलस्यकदाचन॥३५॥ अथतस्यगृहेविप्रोवि
१० [illegible] तःपवि[illegible]॥ पू[illegible]पादयोस्तस्यपूजयित्वाविनीतवत्॥३६॥ पप्रच्छदुःखसंतप्तःस्वप्रजायाश्चकारणं॥ निर्वेदव
[illegible] हजसत्तम॥३७॥ कृपयापरयाविष्टश्चिंतयित्वावचोऽब्रवीत्॥ आदानायप्रदानायऋणसंबंधमाश्रिताः
३८॥ [illegible] संबंधोजायतेषांसुतैरपि॥ दातव्यंवागृहीतव्यंनतवास्तीहकस्यचित्॥३९॥ केनतेजायतांपुत्रःसंबंधो
नहि [illegible] थतप्यसेमोहात्कस्माच्चिंतांप्रपद्यसे॥४०॥ अहीकष्टंजनोनूनंकस्यचिन्मायपाशतः॥ मुह्यतेव्यर्थमेवे
हन्ति [illegible] भृशं॥४१॥ कःपिताकस्यवाभ्राताकस्यवाकःसुतोभवेत्॥ अनादावत्रसंसारेभ्राम्यमाणःस्वकर्मभिः
४२॥ कःसम[illegible]भगवतोमा[illegible]परमोहिनी॥ तत्तुयःप्रभवेत्तीर्त्वाबलादेवविशेषतः॥४३॥ तस्मैनमोभगवतेवासुदे
[illegible]पवेधसे॥ यस्यप्रसादात्संसारंतरंतिसुखतोनराः॥४४॥ अहोवैश्यकुलश्रेष्ठशृणुमेपरमंवचः॥ प्रयागंव्रजधर्मात्म
न्यदि पुत्रफलेस्पृहा॥४५॥ यस्यप्रसादात्सकलाःकामाःसिध्यंतिदेहिनां॥ माघःसंप्रतिनोदूरेवृश्चिकस्योदिवाकरः॥४६
[illegible] यागेयःस्नातितस्य[illegible]सोप्यदूरतः॥ कामनाःकिंपुनस्तस्यसिध्यंतीतिविचारणात्॥४७॥ यियासुस्तत्रचाहंचत्व
[illegible] सांप्रतं॥ अवं[illegible]भविताप्रुत्रःप्रसादाज्जगदीशितुः॥४८॥ इत्युक्तोरत्नपालोसौप्रणिपत्यपुनःपुनः॥ तर्हिमां
नयसाकंतेद्विजश्रेष्ठोद्धरत्वमां॥४९॥ ततःसवैश्योराजर्षेस्यानुपात्रांविधायच॥ प्रातिष्ठतप्रयागायशुभलग्नेशुभेदिने५० १०

९ सेतुन्त्रहंस्नातस्यतत्फलं॥ गंगायमुनयोर्मध्येकरीषाग्निंतुसाधयेत्॥१०॥ अहीनांगोह्यरोगश्चपंचेंद्रियसमन्वितः॥ यावंति
रोमकूपाणितस्यगात्रेषुधीमतः॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते॥ ततःस्वर्गात्परिभ्रष्टःजंबूद्वीपपतिर्भवेत्॥११
सभुक्त्वाविपुलान्भोगान्तत्तीर्थंलभतेपुनः॥ तत्रैवमरणंप्राप्यविष्णुलोकेमहीयते॥१२॥ जलप्रवेशंयःकुर्यात्संगमे
लोकविश्रुते॥ राहुग्रस्तोयथासोमोविमुक्तःसर्वपातकैः॥१३॥ सोमलोकमवाप्नोतिसोमेनसहमोदते॥ षष्टिवर्षसह
स्राणिषष्टिवर्षशतानिच॥१४॥ स्वर्गलोकमवाप्नोतिगंधर्वाप्सरसेवितः॥ परिभ्रष्टस्ततोलोकादग्निहोत्रीभवेन्नरः॥
१५॥ भुक्त्वातुविपुलान्भोगान्तत्तीर्थंलभतेपुनः॥ यस्तुदेहंविकर्त्त्वाशकुनिभ्यःप्रयच्छति॥१६॥ विहंगैरुपभुक्तस्य
शृणुयस्यापितत्फलं॥ शतवर्षसहस्राणिसोमलोकेमहीयते॥१७॥ ततःस्वर्गात्परिभ्रष्टोजंबूद्वीपपतिर्भवेत्॥ गुणवा
न्रूपसंपन्नोविद्वान्सुप्रियवाक्यवान्॥ भुक्त्वातुविपुलान्भोगांस्तत्तीर्थंलभतेपुनः॥ अधःशिरास्तुयोभूत्वाधूम्रपानवि
[illegible]कृत्॥१९॥ शतंवर्षसहस्राणिस्वर्गलोकेमहीयते॥ भुक्त्वातुविपुलान्भोगांस्तत्तीर्थफलमश्नुते॥२१॥ यमुनेचोत्त
रकूलेप्रयागस्यतुदक्षिणे॥ ऋणप्रमोचनंनामतत्तीर्थंपरमंस्मृतं॥२०॥ एकरात्रोषितःस्नात्वाऋणैःसर्वैःप्रमुच्यते॥ सूर्यलो
केमवाप्नो तिअनृणश्चसदाभवेत्॥२२॥ इतिश्रीम॰प्रयागमा॰पंचमो॰॥५॥ युधिष्ठिरउवाच॥ एतच्छ्रुत्वाप्रयागस्यमत्त
यापरिकीर्तितः॥ विशुद्धहृदयंजातंप्रयागस्यतुकीर्तनात्॥१॥ अनाशकफलंब्रूहिभगवन्नत्रकीदृशं॥ कंचलोकमवाप्नोति

CC-0 Pulwama Collection. Digitized by eGangotri

प्र·मा प्रयागेद्विजवर्यायप्रदातव्यः फलमिच्छता॥६५॥ नाद्दनमुपतिष्ठेतकल्पकोटिशतैरपि॥ ततः कंकणमुत्तार्यकरेकृ
२१ त्वाब्रवीन्मुनिं॥६६॥ संकल्पयविधानेनगृह्लीष्वेदुरमांविभो॥ ततोनुज्ञामनुप्राप्यदत्तोतस्मैस्वकंकणं॥६७॥
अन्नस्यनिष्क्रयंकृत्वाश्रगस्त्यस्तुनयेनदा॥ ततोनुज्ञामवाप्यैनंप्रणम्यचपुनःपुनः॥६८॥ ययौस्वेष्टगतिंसद्योवि
मानेनसुवर्चसा॥ अंतर्हितशरीरंततत्तत्क्षणादेवसुव्रत॥६९॥ इत्थंप्रभावंतत्तीर्थंतवप्रोक्तंमयानघ॥ दानानांव्र
ष्टिरुक्ताचनवराजर्षिसत्तम॥७०॥ कथयिष्यामितेराजन्यदन्यत्प्रष्टुमिच्छसि॥७१॥ इतिश्रीमत्स्यपुराणेमार्कंडेययु
धिष्ठिरसंवादेप्रयागमाहात्म्येदशमोध्यायः॥१०॥ युधिष्ठिरउवाच॥ यथायथाकथयसिमहिमानंमहत्तरं॥ तथात
थासुनिश्रेष्ठप्रसन्नंहृदयंमम॥१॥ तववाक्कर्णपीयूषमास्वाद्यहृदयंमम॥ नातितृप्तंभवतिभोयथावैजुषतोमृतं॥२॥ सं
त॥ तस्मात्तच्छ्रोतुमिच्छामिसर्वज्ञंसर्वसंदेहनाशनं॥४॥ मार्कंडेयउवाच॥ शृणुराजन्महावाहोमाहात्म्यंपुनरेवतु॥ नैमिषंपुष्क
रंचैवगोकर्णंसिंधुसागरं॥५॥ गयाचधेनुकंचैवगंगासागरसंगमं॥ अन्यानिचैवतीर्थानियेचपुण्याःशिलोच्चयाः॥६॥ दशती
र्थसहस्राणित्रिंशत्कोट्यस्तथापराः॥ प्रयागेसंस्थितानित्यमेवमाहुर्महर्षयः॥७॥ त्रीणिचाप्यग्निकुंडानियेषांमध्येतु

२२ जान्हवी॥ प्रयागादभिनिष्क्रांतासर्वतीर्थपुरस्कृता॥८॥ तपनस्यसुतादेवीत्रिषुलोकेषुविश्रुता॥ यमुनागंगयासा
र्धंसंगतालोकभाविनी॥९॥ गंगायमुनयोर्मध्येपृथिव्याजघनंस्मृतं॥ प्रयागंराजशार्दूलंतस्यसाम्यंकिमुद्वहेत्॥१०
तिस्रः कोट्योर्द्धकोटीश्चतीर्थानांवायुरब्रवीत्॥ दिविभुव्यंतरिक्षेचगंगायांतानिसर्वशः॥११॥ प्रयागंचप्रतिष्ठानंकंव
लाश्वतरौतथा॥ भोगवत्ययथाचैववेदीप्रोक्ताप्रयागके॥१२॥ तत्रमंत्राश्चवेदाश्चमूर्तिमंतोयुधिष्ठिर॥ प्रजापतिमुपासंते
मुनयश्चतपोधनाः॥१३॥ यजंतेक्रतुभिर्देवास्तथाचक्रधरानृपाः॥ तस्मात्पुण्यतमंनास्तित्रिषुलोकेषुकिंचन॥१४॥ प्र
भावात्तीर्थराजस्यमहत्वात्तीर्थराजतः॥ तत्रगंगामहाभागासदेशस्तेतपोधना॥१५॥ सिद्धक्षेत्रंतुतज्ज्ञेयंयत्रगंगासमाश्रि
ता॥ इदंज्ञात्वाजपेत्कर्णेपुत्रस्यसुहृदस्तथा॥१६॥ इदंपुण्यमिदंस्वर्ग्यमिदंमेध्यमिदंसुखं॥ सुशिष्यस्यानुरक्तस्यगो
प्यमत्यंतमुत्तमं॥ इदंपुराण्यमिदंरम्यंपावनंधर्म्यमुत्तमं॥ महर्षीणामिदंपुण्यंसर्वपापप्रमोचनं॥१८॥ अधीतेचेद्द्वि
जोप्येतंनिर्मलत्वमवाप्नुयात्॥ यस्त्विदंशृणुयान्नित्यंतीर्थंपुण्यंसदाशुचि॥१९॥ जातिस्मरत्वंलभतेनाकपृष्ठेच
मोदते॥ प्राप्यंतेतानितीर्थानिसद्भिःशिष्टानुदर्शिभिः॥२०॥ स्नाहितीर्थेषुकौरव्यनचवक्रगतिर्भव॥ इदंविश्वंयदासर्वं
कल्पांतेसंहरत्यजः॥२३॥ नदानशंतितत्सर्वंप्रयागंनैवनश्यति॥ वटोयस्तत्रतस्यैवशाखायांवालरूपधृक्॥२४॥ शे

CC-0 Pulwama Collection. Digitized by eGangotri

तेपत्रपुटेदेवोमपारदृष्टोमहाद्भुतः॥एकीभूयसमुद्रास्तु प्लावयंतिभुवस्तलं॥२३॥तत्रमज्जंस्तरंगैस्तु प्रोह्यमानस्सम
ततः॥दृष्टमानस्मितंवालंनिकटेगतवानहं॥२४॥प्रविष्टःकिंचिदुपक्रांतःसमाश्वासभयार्दितः॥तावत्तस्यहिवालस्यश्वा
सेनैवोदरंगतः॥२५॥तत्रदृष्ट्वाजगत्सर्वमाश्वस्तःपूर्ववत्पुनः॥अनेकचित्रंतत्रैवस्वाश्रमंप्राप्यतस्थिवान्॥२६॥पु
नस्तस्यैवनिःश्वासात्पतितःप्रलयार्णवे॥संभ्रांतोस्मिमहाग्राहैर्मकरैश्चतिमिंगिलैः॥२७॥ग्रस्यमानइवत्रस्यन्कंप
मानःपुनःपुनः॥एवंस्तुबहुशोराजन्दृष्टवानस्मितंवटे॥२८॥युधिष्ठिरउवाच॥भूम्याःककुदवद्दृष्टःप्रयागोपित
दातदा॥ननाशःप्रलयेप्यासीत्तस्यस्येत्रस्यकर्हिचित्॥२९॥कस्मात्तिष्ठंतितत्रदेवाब्रह्मविष्णुमहेश्वराः॥सहदेवैश्चप्रया
गेस्मिन्कल्पांतेपित्यजंतिन॥३०॥मार्कंडेयउवाच॥प्रयागेनिवसंत्येतेब्रह्मविष्णुमहेश्वराः॥कारणंतत्रवक्ष्यामिशृ
णुतत्वंयुधिष्ठिर॥३१॥पंचयोजनविस्तीर्णंप्रयागस्यहिमंडलं॥तिष्ठंतिरक्षणार्थायपापकर्मनिवारकाः॥३२॥उत्तरेण
प्रतिष्ठानाच्छाल्मलीप्रतितिष्ठति॥ब्रह्माहिनेनरूपेणप्रयागंरक्षतेसदा॥३३॥महेश्वरोवटोभूत्वातिष्ठतेपरमेश्वरः॥
विष्णुर्माधवरूपेणप्रयागंपरिरक्षति॥३४॥ततोदेवाश्चगंधर्वाःसिद्धाश्चपरमर्षयः॥रक्षंतिमंडलंनित्यंपापकर्मनिवा
रकाः॥३५॥तस्मिन्जुहूत्स्वकंदेहन्नरकंनैवपश्यति॥एषब्रह्माश्चविष्णुश्चप्रयागेसमहेश्वरः॥३६॥सप्तद्वीपाःसमु

मुनिश्रेष्ठयोस्मियत्कर्मयादृशं॥श्वेतकेतुरितिख्यातोराजाहमभवंपुरा॥५१॥अग्नयःसुहुतादेवाःपितरश्चैवत
र्पिताः॥दक्षिणाभिरनेकाभीरत्नैश्चविविधैरपि॥५१॥ब्राह्मणास्तोषितानित्यंप्रजाभिःपरिपालनात्॥अहंकारवि
मूढेननचदानंकृतंमया॥५२॥क्षुधयापीडितास्तेनस्वर्गंप्राप्यापिचास्मयं॥विज्ञप्तश्चततोब्रह्मामामुवाचपितामह
५४॥प्रत्यहंतुभुवंगत्वाभक्षयस्वकलेवरं॥नवक्षुधान्यथानाशंनयास्यतिकथंचन॥५५॥एवंब्रह्मणश्चादेशान्म
येदंकर्मगर्हितं॥क्षिपतेहिमुनिश्रेष्ठस्वापराधंममाखिलं॥५६॥इदानींममभाग्येनसंप्राप्तंदर्शनंतव॥यथाममक्षु
धापीडानभवेत्तंतथाकुरु॥५७॥समुद्रःप्राशितःपूर्वंविंध्यवृद्धिर्निवारिता॥अतिदैवंतुतेकर्मतवशक्तिईत्वया५८
शरणंत्वांप्रपन्नोस्मिकृपयामांसमुद्धर॥इतिसंप्रार्थितोराज्ञामहर्षिस्तुष्टमानसः॥५९॥उवाचमधुरंवाक्यंशरणा
गतवत्सलः॥ब्रह्मणानकृतंयत्तेममकाशक्तिरूर्जिता॥तथापितववीभत्संदृष्ट्वाकर्मसुगर्हितं॥घृणामेजायतेन
स्मान्निष्कृतिंतेहंसःशृणु॥६१॥एह्यागच्छमयासार्द्धंप्रयागंप्रतिमानद॥निष्कृतिंतेकरिष्यामिस्वस्यैवंतपसोवला
त॥प्रयागस्तीर्थराजोयंसर्वकामफलप्रदः॥कथंनकुर्यात्तेकाममित्युक्त्वाभ्यगमत्ततः६३॥ततोगत्वाप्रयागंतु
समुनिःशंसितव्रतः॥त्रिवेण्यास्तर्पयित्वातंराजानमभितुष्टुतिं॥६४॥पुनःप्रोवाचराजानमन्नदानस्यनिष्क्रयः॥

CC-0 Pulwama Collection. Digitized by eGangotri

प्र·म· स्मान्नतत्फलमवाप्नुयात्॥ जन्मान्तरसहस्रेण योगो लभ्येत मानवा॥२॥ दानानि दत्वा बहुशो ब्राह्मणेभ्यो विधिक्र
१७ मात्॥ कृच्छ्रचांद्रायणादीनि व्रतानि बहुशस्तथा॥३॥ अटित्वा सर्वतीर्थानि पुण्यान्यायतनानि च॥ कृच्छ्रेणालभ्य
नेयच्चतल्लभ्यं तीर्थराजतः॥४॥ स्नानमात्रेण राजेन्द्र फलं त्रिदशदुर्लभं॥ मकरस्थे गुरौ माघे मकरस्थे दिवाकरे॥५॥
तत्फलं समवाप्नोति सद्य एव नरोत्तम॥ अतिप्रशस्तो योगोयं बहुपुण्यैरवाप्यते॥६॥ अधोदयस्तथा योगस्तीर्थराजे
सुदुर्लभः॥ योगाधियोगयुक्ता ये पुराणैरनुत्तमाः॥७॥ अनेकगुणसंकीर्णाः प्राप्यंते पुण्यगौरवात्॥ विचार्यैवं सुबहु
शो दिवि गायंति देवताः॥८॥ अमार्कश्रवणे पाते व्यतीपाते कुहूदिने॥ माघे मासि गुरौ सूर्ये मकरस्थे महाफले॥ अने
कपुण्यसंभारैरयं योगो ह्यवाप्यते॥९॥ विशेषात्तीर्थराजे तु फलदः सद्य एव हि॥ त्रिदिवेऽनेन लभ्येत किमस्माकं फलं
भवेत्॥१०॥ यत्पूर्वसंचितं तस्यापि हानिर्भवति केवलं॥ मनुष्यलोके जन्म स्याद्यदि नस्तेन सत्वरं॥११॥ प्रयागं प्राप्य योगे
स्मिन्स्नानमात्रेण सत्वरम्॥ योगादि दुर्लभं पश्चयेन स्यात्परमं पदं॥१२॥ इति नित्यं हि शोचंति देवाः स्वर्गौकसोप्यलं॥ त १७
स्मात्त्वमपि भूपाल श्रद्धया स्नानमाचर॥१३॥ प्रयागे ह्यमृतस्यंदे सर्वकामकरंडके॥ प्रधाने हेतुमाकांक्षन् चतुर्वर्गैकसा
धनं॥१४ यथा सर्वेषु भूतेषु सर्वत्रैव च दृश्यते॥ ब्राह्मणोभ्यः परं नास्ति एवं ग हपितामहः॥१५॥ तद्वत्प्रयागतीर्थात्तु तीर्थं

१८ मन्यन्न विद्यते॥ ब्रह्मणश्चैव सर्वेषामाधारः परमाश्रयः॥१६॥ कामानां परमाधारः सर्वश्रेयः समाप्यते॥ यत्र तत्र मह
च्चित्रं किं वा पापस्य संक्षये॥१७॥ सर्वेषां चैव भूतानां ब्रह्मणः श्रेयसां वरः॥ तथा सर्वेषु तीर्थेषु तीर्थराजः प्रशस्यते॥१८
यथा सर्वेषु देवेषु भगवान्भूतभावनः॥ तथा सर्वेषु तीर्थेषु तीर्थराजं प्रशस्यते॥१९॥ यथा सर्वेषु मंत्रेषु गायत्री चोत्तमोत्त
मा॥ यथा च सर्वयज्ञेषु जपयज्ञः परः स्मृतः॥२०॥ तथैव सर्वतीर्थेषु प्रयागः सरमः स्मृतः॥ सामवेदो हि वेदानां परमो य
हुदुच्यते॥२१॥ तथैव तीर्थराजो पीत्याहुः सर्वे मनीषिणः॥ इंद्रियाणां मनो यद्वत्सहस्राणां पिप्पलो यथा॥२२॥ नदीनां च
यथा गंगा तथैवेदं महत्फलं॥ सत्यलोके स्थितो धाता प्रयागं स्मरते सदा॥२३॥ अत एव निजं रूपं द्विधा कृत्वात्र संस्थितः
कदाचिच्चलते नैव स्थाणुवत्स्थिरतां गतः॥२४॥ अनेनैवानुमानेन बुद्ध्यस्व त्वं युधिष्ठिर॥ प्रयागादधिकं नास्ति यथावत
कथितं तव॥२५॥ युधिष्ठिर उवाच॥ उक्तानि सर्वतीर्थानि यमुनाकूलगानि तु॥ गंगाकूलगतानि सुस्नातानि तीर्थानि मे वद
२६॥ मार्कंडेय उवाच॥ प्रथमं वटमूले तु तीर्थं सारस्वतं परं॥ तत्र स्नातो नरो याति लोकं सारस्वतं ध्रुवं॥२७॥ ततो त्रितीर्थं वि
ख्यातं सिद्धिदं परमं महत्॥ यत्राचिरं तु सूर्याच समाराध्य चमत्कृतः॥२८॥ कर्तारं सर्वभूतानां धातारं परमेश्वरं॥ साधा
रण्येन संराध्य ब्रह्मरुद्रहरीन्परान्॥२९॥ पुत्रान्लेभे महाप्राज्ञस्त्रीन्त्रिभ्योपि यशस्विनः॥ सोमं दुर्वाससं चापि दत्तात्रेयममि

CC-0 Pulwama Collection. Digitized by eGangotri

तीश्वरान्॥३०॥ अंशभूतास्त्वपाणांचदेवानांभक्तवत्सलान्॥ तत्रस्नात्वापुत्रकामःपुत्रंप्राप्नोतिसंशयः॥३१॥ ततो
रहस्यतेस्तीर्थंयत्रलेभेपरांगतिं॥ गुरुस्त्वसर्वदेवानाममगाज्जीवःससान्वयः॥३२॥ तत्रस्नात्वासमाप्नोतिविद्यांयामभिकां
क्षति॥ ततःपरंमहत्तीर्थंविश्वामित्रस्यशर्मदं॥३३॥ यत्रलेभेक्षत्रियोपिब्राह्मण्यमतिदुर्लभं॥ यत्रस्नात्वानरोयातिग
यश्रीजाप्यजंफलं॥३४॥ शक्रतीर्थंततोगत्वास्नात्वासंतर्प्यवैपितॄणां॥ पितामहानिंद्रलोकंसंप्रापयतिसत्वरं॥३५॥ यत्र
मुक्तःसहस्राक्षःशापाद्गौतमसंभवात्॥ तत्रस्नात्वानरःपूतोगम्यागमनसंभवात्॥३६॥ मुच्यतेपातकात्सर्वात्स्वर्गलोकंच
गच्छति॥ दशाश्वमेधिकंतीर्थंसर्वयज्ञफलप्रदं॥३७॥ ब्रह्मणायत्रविहितावाजिमेधादशप्रभो॥ तत्तीर्थंपरमंपुण्यं
सर्वकामफलप्रदं॥३८॥ यत्रस्नात्वासकृन्मर्त्योविधिनाभारतोत्तम॥ अयज्ञकरणात्पापान्मुच्यतेनात्रसंशयः॥३९॥ प्रा
णांस्तत्रपरित्यज्यब्रह्मलोकंसगच्छति॥ अतःपरंप्रवक्ष्यामिपूर्वकूलस्थितान्यपि॥४०॥ ऐलतीर्थमितिख्यातंयत्ररा
जापुरूरवाः॥ कुरूपत्वंसमुत्सृज्यसुरूपोभवदच्युत॥४१॥ यत्रस्नात्वानरोराजन्सुरूपोजायतेध्रुवं॥ नलतीर्थंततःपुण्यं
पुण्यश्लोकस्यधीमतः॥४२॥ वीरसेनसुतोराजास्वराज्यंयत्रलब्धवान्॥ तत्रस्नात्वाहृतंराज्यंपरैःस्वंचप्रपद्यते॥४३॥ १९
सर्वपापविनिर्मुक्तःअन्यदोषैर्नबाध्यते॥ उर्वशीतीर्थंविख्यातंततःपरमपावनं॥४४॥ यत्रशापाद्विनिर्मुक्ताउर्वशीस्व

१७ विप्रास्तुंठितावहवोजनाः॥६२॥ धनंचापहृतंचौर्यात्पथिकानांमहात्मनां॥ धर्मवार्तानजानातिगोघ्नोयंनिरपत्रपः॥
६३॥ कस्माद्दस्यचजायंतेनरकाःशीतलाःसुखाः॥ एतस्मिन्नंतरेब्रह्मासर्वेषांयःपितामहः॥६४॥ विमानंप्रेषयामासस्व
गणैश्चसमन्वितं॥ तेतुंस्वलोकंनेतव्याधंशिक्षयित्वेतिचेतिच॥६५॥ गत्वातेत्वरितंतत्रशासनंब्रह्मणोवद॥ यमोप्युवा
चमेदेवानकथमेनंतुपापिनं॥६६॥ स्वलोकंनेतुमत्युग्रमर्हथागंतुसत्तमाः॥ तमूचुर्ब्रह्मणस्तेपिकिंकराःशृणुमान
द॥६७॥ वेणीजलेस्यचास्थीनिपतितान्यभवन्प्रभो॥ पूर्वकृतानिपापानितत्क्षणात्विलयंययुः॥६८॥ निष्पापोयं
चसंजातःसत्यलोकंप्रयास्यति॥ व्यापादितोयंव्याघ्रेणतस्यास्थीनिचवैततः॥६९॥ पातितानिचतत्रैवकस्यचित्पथि
कस्यहि॥ व्याघ्रेणसंपुटास्थीनिनिःक्षिप्तानिचसर्वशः॥७०॥ संपुटोयसुसंपूर्णमितिबुद्ध्यपहृत्यच॥ उत्पाट्यास्थीनिदृष्ट्वा
चनिःश्वस्योच्चैश्चनिक्षिपेत्॥७१॥ गवेषयंतनस्यानिसंप्राप्यपरिगृह्यच॥ सहतैःसहितान्वेवाहूयायांनिक्षिप्तवान्द्विजः॥
७२॥ वेणीजलस्यसंस्पर्शात्सर्वथाक्षीणपातकः॥ नेतव्योयंविभोःपार्श्वेभाग्यवानितिनिश्चितं॥७३॥ इत्युक्त्वातंसमा
रोप्यविमानेसूर्यसन्निभः॥ सत्यलोकाययनिन्युस्तेविधात्राज्ञापुरस्कृताः॥७४॥ एवंपरमपापिष्ठोव्याधोप्यामिषभोजनः
वेण्याप्लुतास्थिकःशुद्धःक्षीणपापोदिवंगतः॥७५॥ इतिश्रीम॰पुराणेप्रयागमाहात्म्येअष्टमोध्यायः॥८॥ मार्कंडेयउ
वाच॥ अन्यच्चशृणुराजर्षेयथादृष्टंतथाश्रुतं॥ कृत्वाप्रमाणंशास्त्रंतुयुज्यतेयोगमात्मनः॥१॥ क्लिश्यतेकेवलंत

CC-0 Pulwama Collection. Digitized by eGangotri

प्र०मा० तो परित्यजेत् ॥ ९ ॥ अन्यत्र यत्कृतं पापं प्रयागं प्राप्य नश्यति ॥ प्रयागे यत्कृतं पापं वज्रलेपो भविष्यति ॥ १० ॥ नान्यत्र तत
१६ क्षणं याति प्रायश्चित्तशतैरपि ॥ युधिष्ठिर उवाच ॥ प्रयागकृतपापानां कथं वा निष्कृतिर्भवेत् ॥ ११ ॥ एतन्मे वद तत्त्वेन
यथावदनुपृच्छतः ॥ मार्कण्डेय उवाच ॥ राजन्सम्यक्कृतः प्रश्नस्त्वया लोकोपकारिणः ॥ १२ ॥ शृणु तत्ते प्रवक्ष्या
मि यथा ब्रह्ममुखाच्छ्रुतं ॥ प्रमादादप्रमादाद्वा प्रयागे यदघं भवेत् ॥ १३ ॥ तथा तन्निष्कृतिर्दृष्टा तान्निबोध युधिष्ठि
र ॥ अज्ञानेन कृतानि स्युः पातकानीह यानि तु ॥ १४ ॥ कृच्छ्रचान्द्रायणाद्यैस्तु व्रतैर्नानाविधैरपि ॥ माघस्नानेन तत्रैव
तिलपात्रप्रदानतः ॥ १५ ॥ जपैर्होमैस्तथा दानैरनुतापो यदा भवेत् ॥ ज्ञानात्कृतानि पापानि यानि तेभ्यस्तु पापकृत्
करीषाग्निं प्रविश्याथ तथा प्रायोपवेशनात् ॥ वेणीं प्रविश्य वा सद्यो देहान्तादेव शुध्यति ॥ १७ ॥ युधिष्ठिर उवाच ॥ श्रु
त्वेदं त्वन्मुखाद्विप्र नष्टो मे संशयो महान् ॥ प्रसन्नं मे मनो जातं सन्निधानात्तवैव हि ॥ १९ ॥ एकं त्वयोक्तमिच्छामि श्रो
तुं भार्गवसत्तम ॥ प्राप्यते केन वा स्वर्गो दानेन तपसापि वा ॥ २० ॥ इष्टापूर्तेन वा विप्र भोगान्नानाविधानपि ॥ तारतम्य
फलं वापि जायते केन तद्वद ॥ २० ॥ दानैर्व्रतैश्च तीर्थैश्च इष्टापूर्तैस्तथा जपैः ॥ होमैर्वा देवपूजाभिर्ब्राह्मणानां च तर्प
णैः ॥ २१ ॥ तन्मे वद सुनिश्चित्य सर्वं जानाति यद्भवान् ॥ मार्कण्डेय उवाच ॥ सर्वं त्वयोक्तं स्वर्गस्य कारणं विद्धि भूपते ॥ २२ ॥

सर्वैश्च प्राप्यते स्वर्गः पापं यदि न जायते ॥ अपातुः पुण्यतः स्वर्गे प्रतिबन्धः प्रजापते ॥ २३ ॥ दानेन भोगमाप्नोति दानेनैवे
सुखी भवेत् ॥ येन दत्तं द्विजातिभ्यः स्वर्गतो प्राप्नुयान्न तत् ॥ २४ ॥ तस्मात्तीर्थेषु यात्रायां दद्याद्वित्तस्य शक्तितः ॥ यद्यत्प्रिय
तमं लोके तत्तद्दद्याद्द्विजातिषु ॥ २५ ॥ अन्नं वस्त्रं च गामश्वं भोगानुच्चावचांस्तथा ॥ यद्देव न द्विजे दत्तं तत्स्वर्गेपि ल
भ्यते ॥ २६ ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनं ॥ श्वेतकेतुरभूद्राजा पुरा भरतसत्तम ॥ २७ ॥ धर्मात्मा संयतात्मा
च दाता ब्राह्मणपूजकः ॥ यज्ञशीलः प्रजापालो देवताराधने परः ॥ २८ ॥ गोभूहिरण्यरत्नानि वस्त्राश्वगजभूरुहाः
अनेकशो द्विजातिभ्यस्तेन दत्ता महात्मना ॥ २९ ॥ अथ कालेन बहुना राजा कालवशं गतः ॥ दिव्यं विमानमारुह्य ग
तो ब्रह्मपुरं प्रति ॥ ३० ॥ नानाभोगसमायुक्तो गन्धर्वाप्सरसां गणैः ॥ गीयमानोनुगैः सार्धं रेमे तत्र मुदान्वितः ॥ ३१ ॥ रम
णीयेषु देवेषु रेमोद्यानेषु भूरिशः ॥ एवं स भोगवान्राजा स्वर्गतोपि युधिष्ठिर ॥ ३२ ॥ क्षुधया पीडितो नित्यं ददाविता
मुपागतः ॥ यस्मात्सोढुमवस्थां तुं नाशक्नोद्व्याकुलेन्द्रियः ॥ ३३ ॥ तदापृच्छद्विधातारं विनयानतकंधरः ॥ प्राप्तः स्वर्ग
महद्देव दिव्यभोगसमन्वितः ॥ ३४ ॥ पीड्यतः क्षुधया नित्यं संतप्यामि सुदुःखितः ॥ कथं क्षुधा निवर्तेत तन्मे ब्रूहि कृपां २
कुरु ॥ ३५ ॥ ततोब्रवीद्विधाता च राजानममितद्युतिं ॥ त्वया दत्तानि दानानि सर्वाण्येव नृपोत्तम ॥ ३६ ॥ अन्नदानं

CC-0 Pulwama Collection. Digitized by eGangotri

तु कृतं तेन त्वं पीड्यसे क्षुधा ॥ पोषितं स्वशरीरं यन्मिष्टान्नैः केवलैरपि ॥ ३७ ॥ भोजितान हिजाभक्त्या दीनांधकृपणा
अपि ॥ न तर्पिताः किमन्नं द्रष्टव्यमेवाखिलार्थदं ॥ ३८ ॥ द्विजैः संबोधितोपि त्वमन्नं नैव ददासि यत् ॥ अहं सर्वं विजा
नामि ज्ञानामतो न कश्चन ॥ ३९ ॥ अहंकारेण संयुक्तस्तथा कथयसे परं ॥ परं तत्त्वं न जानासि अन्नदानेन यत्फलं ॥
४० ॥ अन्नाद्भवंति भूतानि अन्ने प्राणाः प्रतिष्ठिताः ॥ अन्नदः प्राणदस्तस्मादन्नदः सुखमाप्नुते ॥ ४१ ॥ तस्मात्त्वं भद
त्त्वयं शरीरं चान्नसंभवं ॥ राजन्क्षुधानिवृत्त्यर्थं देहं भक्षय नित्यशः ॥ ४२ ॥ पोषितं यच्छरीरं ते भविष्यति तथैव तत् ॥ प्र
त्यहं भक्षितमपि पुनः पुष्टं भविष्यति ॥ ४३ ॥ क्षुधा निरस्त्य ये तुभ्यमन्यत्किंचिन्न विद्यते ॥ एवं संब्रह्मणादिष्टो भक्ष
यित्वा कलेवरं ॥ ४४ ॥ पुनर्याति स्वकस्थानं प्रत्यहं बहुवासरं ॥ कदाचित्तेन मार्गेण अगस्त्यो भगवानृषिः ॥ ४५ ॥ प्र
यागं स्नातुमागच्छद्ददर्श पथि तं नृप ॥ विमानेनार्कवर्णेन भ्राजमानं स्वतेजसा ॥ ४६ ॥ अवरुह्य विमानात्स्वाद्भक्ष
यंतं कलेवरं ॥ आश्चर्यं परमं प्राप्य पप्रच्छ नृपसत्तमं ॥ ४७ ॥ अहो स्वर्गे भवाने यदिव्यरूपसमन्वितः ॥ अनेकभो
गसंयुक्तः किं करोषि जुगुप्सितं ॥ ४८ ॥ वीभत्सं खलु लेकस्मादेवं कर्म समास्थितं ॥ को भवांस्तेजसा पूर्णस्तन्मे शं
सितुमर्हसि ॥ ४९ ॥ मुनेर्वाक्यं समाकर्ण्य श्वेतकेतुः सुदुःखितः ॥ प्रणिपत्य मुनिश्रेष्ठं प्रत्युवाच सविस्मयं ॥ आकर्ण्य


र्गे वेवच ॥ पुनः स्वस्थानमासाद्य मोदते पूर्ववन्नृप ॥ ४५ ॥ तत्र स्नात्वोर्वशीलोकं नरः प्राप्नोत्यनुत्तमं ॥ ततस्त्वरुंधती तीर्थं
त्रिषु लोकेषु विश्रुतं ॥ यत्र स्नात्वा मुनीनां वै प्राप्नुयाल्लोकमुत्तमं ॥ ततः परं यज्ञतीर्थं त्रिषु लोकेषु विश्रुतं ॥ ४७ ॥ तत्र
स्नात्वा नरः सर्वयज्ञानां लभते फलं ॥ देहावसानं संप्राप्य ब्रह्मलोकं च गच्छति ॥ ४७ ॥ अन्यान्यपि च तीर्थानि शतशोथ
सहस्रशः ॥ तीर्थराज्यं समाश्रित्य संति भूरिफलानि च ॥ ४८ ॥ प्रयच्छंति नृणां स्नानात्तन्महिमानं तको वदेत् ॥ ५० ॥ इति श्री
म॰ प्र॰ माहा॰ नवमोध्यायः ॥ ९ ॥ युधिष्ठिर उवाच ॥ प्रयागे पुण्यकरणात्प्राप्यते गतिरुत्तमा ॥ यदि पापं तत्र कुर्याज्ज्ञा
नाज्ज्ञानतोपि वा ॥ १ ॥ कां गतिं समवाप्नोति कथयैतन्महामुने ॥ मार्कंडेय उवाच ॥ यथा पुण्यकृतां तत्र जायते सुमहत्
फलं ॥ २ ॥ पापकर्मकराणां च तथैव स्यात्फलं महत् ॥ तैलविंदुर्जले यद्वत्क्षिप्तः सकलं जलं ॥ ३ ॥ व्याप्नोति पातकं तद्व
त्तीर्थराजे सुदुस्तरं ॥ नरके स पतेत्तीव्रा भुंजन्वै यमयातनाः ॥ ४ ॥ तीर्थे न पातकं कार्यं नियमं परमं चरेत् ॥ सावधानैरवस्थेयं
यथा पापं न जायते ॥ ५ ॥ अनेकयुगपर्यंतं तस्य नो निष्कृतिर्भवेत् ॥ पुण्यकृत्स्वर्गमाप्नोति पापकृन्नरकं व्रजेत् ॥ ६ ॥ तदेव
यदि तीर्थेषु कृतमस्य प्यतां व्रजेत् ॥ करोति चेन्नर पापं तदा तीर्थाद्बहिर्व्रजेत् ॥ ७ अधोधो गच्छति नरस्तीर्थे पापपथाभ
वेत् ॥ न निष्कृतिर्युगांते पि तीर्थं तस्मात्परित्यजेत् ॥ ८ ॥ अपि कामातुरो जंतुरेकां त्यजति मातरं ॥ प्रयागमेकमेवं तु पापक

CC-0 Pulwama Collection. Digitized by eGangotri

प्र॰मा॰ व्यशृंगश्चैरैभ्यस्त्रयारुणिः शुकः ॥ जंबूमार्गनिवासायेनैमिषारण्यवासिनः ॥ १५ ॥ सैन्धवारण्यवासायेदंडकारण्यवा
१५ सिनः ॥ कलापग्रामवासाश्चयेवाप्यन्येमहर्षयः ॥ १६ ॥ गत्वाप्रयागंसेवंतेतस्यमाहात्म्यवर्णने ॥ कः शक्तस्तीर्थराजस्य शंसि
तः कोनुजायते ॥ १७ ॥ चेत्कीकसंतत्रपतेन्मर्त्यस्यान्यस्यवापुनः ॥ निःसृत्यनरकात् घोरात्स्वर्गंप्राप्नोशाश्वतं ॥ १८ ॥ किंपु
नःक्लिन्नसर्वांगोवेणीसलिलमज्जनात् ॥ अत्रार्थमत्पुरावृत्तंतन्निशामयभूपते ॥ १९ ॥ विंध्याटव्यांपुराकश्चित्व्याधःप
क्षिमृगांतकः ॥ लुंठकोमार्गमावृत्यब्रह्मघ्नोदुष्टचेष्टितः ॥ २० पथिकानांतुसंचारंज्ञात्वातिष्ठन्निलीयसः ॥ अकस्मात्तन्निप
त्यैवमात्रामादायगच्छति ॥ २१ ॥ इत्थंतस्कररृत्त्यैवघातयन्बहुधाजनान् ॥ निघ्नन्नानाविधान्जीवान्पापकर्मातिनिष्ठुरः ॥
२२ ॥ कदाचिध्धनुरादायसकांडमृगयारतः ॥ महारण्यंसंप्रविश्यमृगान्निघ्नन्श्रमातुरः ॥ २३ ॥ व्याघ्रेणपातितोदैवान्मृतोमा
र्गेसपापकृत् ॥ यमदूतैस्तदागत्वाबध्वानीतोयमस्यपं ॥ २४ ॥ पीड्यमानोपिबहुधाकशाभिर्यमकिंकरैः ॥ आक्रंदन्प्रापितो
घोरनरकेयमशासनात् ॥ २५ ॥ पातनाभिःसुबह्वीभिःशास्यमानःसुदारुणः ॥ रौरवादिषु नारेषुक्रमशःपातितोभृशं ॥ २६ कुं
भीपाकेतप्ततैलेकालसूत्रेदुरासदे ॥ सूचीमुखेचासिपत्रेशाल्मलिककचादिषु ॥ २७ ॥ अवटेरुध्यमानोहिपूयशोणितकर्दमे
एवंनानाविधायाम्यायातनाबहुवत्सरं ॥ २८ ॥ वर्तितेनरकेभुंजन्पच्यतेस्वेनकर्मणा ॥ मारितोपत्रसिंहेनवनेव्याधःपुराह्यभूत् ॥ १५
अथनेनपथायाताःकेचित्कार्पटिकोत्तमाः ॥ २९ ॥ पल्लीसमीपमागत्यपक्कणानांचपालिकाः ॥ समतिक्रम्यविश्रांतानातिदूरंविशश्र

१६ मुः ॥ ३० ॥ विश्वासात्तत्रनिक्षिप्यतांमात्रामलसाद्भृशं ॥ कश्चित्कार्पटिकश्रेष्ठोमात्रामामुच्यबंधनात् ॥ ३१ ॥ मूषकैःकिंनिद्रा
तंस्यात्सुप्तोयत्रस्थितोनिशि ॥ द्रष्टव्यमितिसंचिंत्यसर्वंद्रव्यंपरीक्ष्यच ॥ पुनस्तथाविधंकृत्वाविशश्रामक्षणंभुवि ॥ तावन्निद्रा
न्वितोनेत्रेमुकुलीकृत्यसंस्थितः ॥ ३३ ॥ तत्रकश्चिन्मृगव्याधोवृक्षमारुह्यतिष्ठति ॥ तेनदृष्टःसंपुटस्तत्पित्रोस्तस्यास्थिसंभृ
तः ॥ ३४ ॥ द्रव्यस्येतिचविज्ञायावरुह्यशनकैस्तरो ॥ मात्रामुन्मुच्यशनकैर्गृहीत्वासंपुटंततः ॥ ३५ ॥ अपयातस्त्वरण्यानितत्रोत
घाटितवान्पृथक् ॥ पिधानंचपृथक्कृत्यदृष्टवान्वेष्टनादिकं ॥ ३६ ॥ दृष्ट्वास्थीनिविनिःश्वस्यक्षिप्त्वाचगृहमागतः ॥ संपुटंपट्ट
चीरंचगृहीत्वादुःखसंयुतः ॥ ३७ ॥ अहोमयाहृतंचौर्यात्संपुटंतत्रचापिहि ॥ मंदभाग्यान्नलब्धानितत्रास्थीनिविशेषतः ॥ ३८
दैवमेवपरंमन्येधिक्पौरुषमनर्थकं ॥ इत्युक्त्वाखेदमागत्यवनमेवप्रतस्थिवान् ॥ ३९ ॥ क्षणंसुप्तोत्थितस्तावत्सचकार्प
टिकोत्तमः ॥ मात्रामुमोचतांदृष्ट्वारहितांसंपुटेनतु ॥ ४० ॥ आक्रंदन्भूरिदुःखेनरुरोदचपुनःपुनः ॥ आक्रंदंतंतथादृष्ट्वा
त्वन्यःकार्पटिकस्तदा ॥ ४१ ॥ दृष्टतोभ्यागतःकश्चित्पृच्छा ... भ्यासयंच्छनैः ॥ किमर्थंरुद्यतेसाधोकेनतेपहृतंवद ॥ ४२ ॥
नीतंकिंचित्ताडितोवापीडाकाचित्तवांगके ॥ इतिपृष्टःसार्थकेनपांथेनपथिकस्ततः ॥ ४३ ॥ सर्वंतत्कथयामासयथा
संपुटकोगतः ॥ ममभाग्यात्तुपित्रोर्वाहृतःकेनापिसंपुटः ॥ ४४ ॥ कीकमानांमहाभागकिंकुर्यांक्वव्रजेत् ॥ कं या
मिशरणंतातकुत्रवाहंगवेषये ॥ ४५ ॥ कःउपायोत्रवैकार्योविचार्यवदमेसखे ॥ एवंव्याकुलचित्तंतंशोचंतंपथिकोब्र

CC-0 Pulwama Collection. Digitized by eGangotri

वीत॥४६॥ आगच्छतो मया दृष्टः कश्चिद्व्याधो द्विजोत्तम॥ अपाक्रांतः पथानेन त्वत्समीपे तु सत्वरः॥४७॥ अन्वेषया
मो गत्वा तु न दूरे स गतो भवेत्॥ तर्कयेह महाभाग सह यामो वयं द्विज॥४८॥ इत्युक्तः पथिकेनासौ गतो मार्गेण येन च॥ ते
नैव जग्मुस्ते विप्राः शोधयंतो वनाद्वयं॥४९॥ अथैकस्मिन् वनोद्देशे चीराणि ददृशुः किल॥ तत्रास्थ्येव चास्थीनि ददृशुः
सुबहून्यपि॥५०॥ चीरखंडानि चिन्हानि विदित्वा स्वानि ते तदा॥ बहून्यस्थीनि दृष्ट्वा च संशयं प्रतिपेदिरे॥५१॥ विज्ञानेन च
निश्चित्य स्वीयान्येवेति पांथकः॥ पट्टखंडैस्तथोर्णाभिर्जगृहे तन्मतेन च॥५२॥ विचिंत्य चीरखंडेन बध्वा तूर्णं समीययुः ब
र्णयंतस्तस्य भागं जहृषुः पथिकाः परे॥५३॥ ततः समेत्य ते सर्वे यथागतमगुः शनैः॥ कथयंतः कथा बह्वीर्नानातीर्थाश्र
याः पृथक्॥५४॥ तत कतिपयाहोभिस्तीर्थराजं समीयुः॥ अस्थीनि चिक्षिपुर्वेण्यां सस्नुश्च विधिना ततः॥५५॥ अस्थि
प्रक्षेपमात्रेण ततस्तस्मिन् सरोजले॥ नरके ये स्थिताः पूर्वं सर्वे ते त्रिदिवं ययुः॥५६॥ त्रिवर्स्याप्य पितरो ब्रह्मलोकमुपागताः
नरके पच्यमानो यो व्याध उक्तो मया नृप॥५७॥ सोग्नौ प्रपात्यमानोपि हिमशीतलमन्वभूत्॥ क्रकचैः पीड्यमानोपि का
यभेदं न याति च॥५८॥ छेदनं भेदनं चापि स पापी प्रापनकचित्॥ दृष्ट्वा तन्महदाश्चर्यं यमदूता यमांतिकं॥५९॥ गत्वाश
शंसुस्तत्सर्वं यमोप्याश्चर्यमाययौ॥ चित्रगुप्तं च पप्रच्छ सुकृतं चास्य किं भवेत्॥६०॥ यातनारहितः कस्माज्जातोयं पा १६
पजीवितः॥ चित्रगुप्तोप्युवाचैनं सुकृतं नास्य वेद्म्यहं॥६१॥ बाल्यादारभ्य जीवानां घातनं कृतवानसौ॥ हिंसिता बहवो

पठते वा शृणोति यः॥४८॥ मुच्यते सर्वपापेभ्यः स्वर्गलोकं स गच्छति॥४९॥ इति श्रीप्रयागमाहात्म्यमत्स्यपु॰ सप्तम॥
॥युधिष्ठिर उवाच॥ श्रुतं मे ब्रह्मणा प्रोक्तं पुराणे ब्रह्मसंभवे॥ तीर्थानां तु सहस्राणि प्रयुतान्यर्बुदानि च॥१॥ सर्वाण्ये
व सुपुण्यानि पापहारीणि सर्वशः॥ पृथिव्यां नैमिषं पुण्यं मांतरिक्षं च पुष्करं॥२॥ कुरुक्षेत्रं हरिद्वारं द्वारकां मथुरां त
था॥ अयोध्यादीनि पुण्यानि परित्यज्य द्विजोत्तम॥३॥ कथमेकं प्रयागं त्वमाधिक्येन प्रशंससि॥ अश्रद्धेयमिवाभाति
सर्वेभ्योप्यधिकं वदन्॥४॥ गतिस्तत्रैव परमा भोगाश्च विहिकामिताः॥ अस्यापारे महत्पुण्यं मयं मे संशयो महान्॥५॥
त्वं चापि चिरंजीवी सन् त्वद्दृष्टा बहुश्रुतः॥ वेदत्वार्थविच्चैव पुराणानां प्रदर्शकः॥६॥ इमं मे संशयं छिंधि मूलं प्रमा
ण्यदर्शनात्॥ मार्कंडेय उवाच॥ मा कुरुष्वात्र संदेहमश्रद्धां त्यज भूपते॥७॥ अश्रद्धाने तीर्थस्य फलं सम्यङ् न जाय
ते॥ अस्मदुक्ते पि वाश्रद्धा तव राजन्महामते॥८॥ श्रुतिमूलं मया प्रोक्तं श्रुतिमंत्रं निशामय॥ सितासिते सरिच्छ्रेष्ठे संगते
यत्र वै सदा॥९॥ तत्राप्लुता दिवं यांति न तु त्यागेऽपवर्गिणां॥ स्वर्गमार्गस्य सोपानं मोक्षनिःश्रेणिभूमिका॥१०॥ यत्र वेणी सु
खश्रेणी कामानां सदनं महत्॥ कस्य तत्रापि संदेहो धर्मक्षेत्रे सुखास्पदे॥११॥ इत्याहुः सर्ववेदानां पुराणार्थप्रदर्शकाः॥
देवर्षयो नारदाद्या योगिनः सनकादयः॥१२॥ ये सिद्धाः कपिलाद्याश्च कश्यपाद्या महर्षयः॥ ब्रह्मर्षयो मत्वा ते च प्रयाग
मुपसेवते॥१३॥ जामदग्न्यो भरद्वाजो जैगीषव्योथ लोमशः॥ परशरश्च मैत्रेयः कृष्णद्वैपायनस्त्रितः॥१४॥ कवषोत्र

CC-0 Pulwama Collection. Digitized by eGangotri

स्मिदर्शनात्तेनपोध॥१॥ अद्यमुक्तोस्मिसर्वस्मात्किल्बिषात्त्वदनुग्रहात्॥ शुद्धंमेमानसंजातंत्वद्दर्शनात्तादेवतेमुने॥२॥ श्रु
त्वचित्तोस्म्यहंब्रह्मन्जातामेविमलामतिः॥ श्रीमार्कंडेयउवाच॥ दृष्ट्वातेविमलाबुद्धिर्दिष्ट्याचित्तंस्थिरंतव॥३॥ दिष्ट्या
तेनिर्मलोजातः श्रवणादेवसुव्रत॥ पृच्छस्वयत्त्ववक्तव्यंकिमन्यच्छ्रोतुमिच्छसि॥४॥ युधिष्ठिरउवाच॥ यमुनास्ना
नजंपुण्यंकिंवाफलमुदीरितं॥ तन्मेवदसमासेनयद्यनुग्राह्यतामयि॥५॥ मार्कंडेयउवाच॥ तपनस्यसुतादेवीत्रिषुलो
केषुविश्रुता॥ समागतामहाभागयमुनायत्रनिम्नगा॥ संभूयगंगयासार्द्धंसहैवाब्धिमुपागता॥ स्मरणात्कीर्तनाद्वापिसर्व
पापक्षयावहा॥ तत्रस्नात्वाचपीत्वाचनिष्पापोजायतेक्षणात्॥ गंगयासहसंगम्यसरस्वत्यातथाशुभा॥८॥ तेनवेणी
तिविख्यातात्रैलोकेपरमोत्तमा॥ पापेन्धनदवज्वालापापद्रुमकुठारिका॥९॥ साराजन्दर्शनादेवसर्वपापौघहारिणी स्व
र्गद्वारस्यनिः श्रेणिर्यावेणीप्रविराजते॥१०॥ मोक्षलक्ष्मीहिरण्यंचश्रियंवेणीददातिसा॥ तत्रस्नात्वाचपीत्वाचपुनात्या
सप्तमंकुलं॥११॥ प्राणांस्त्यजतियस्तत्रसयातिपरमांगतिं॥ तत्रसूर्यसुतायांयः स्नात्वाम्यत्रमृतोयदि॥१२॥ सूर्यलोकमवा
प्नोतिदिव्यभोगसमन्वितः॥ प्राणत्यागीनरस्तत्रकैवल्यपदलाभभूः॥१३॥ अग्नितीर्थमितिख्यातंयमुनादक्षिणेतटे॥ तत्र
स्नात्वानरोयातिवन्हिलोकंनसंशयः॥१४॥ पश्चिमेधर्मराजस्यतीर्थंत्वनरकंस्मृतं॥ तत्रस्नात्वादिवंयांतियेमृतास्तेतुमुक्त
काः॥१५॥ वीरतीर्थमितिख्यातंपश्चिमेतस्यभूपते॥ तत्रस्नात्वावीरलोकंप्राप्नोतिविजयः पुमान्॥१७॥ विजयंप्राप्नुया



द्दिटसुशौर्यधैर्ययुतःसदा॥ यमुनादक्षिणेश्रीमान्विष्णुर्माधवनामकः॥१७॥ तदधस्तात्तुतीर्थंतत्रस्नात्वाविधानतः
पूजयेन्माधवंभक्त्याविष्णुलोकंप्रपद्यते॥१८॥ प्राणांस्त्यजतिचेत्तत्रजायतेह्यपुनर्भवः॥ तस्मात्तुपूर्वदिग्भागेसोमतीर्थ
मितिस्मृतं॥ सोमेश्वरसमभ्यर्च्यसोमलोकंमहीपते॥ तत्रसोमस्तपस्तेपेसहस्रंपरिवत्सरान्॥२०॥ संस्थाप्यलिंगं
श्रीशंभोः शांतयेराजयक्ष्मणः॥ यथापूर्वंनिजंदेहंप्राप्तः शंभोरनुग्रहात्॥२१॥ तत्रस्नात्वातुरोगेणमुक्तोभवतिना
न्यथा॥ हित्वाकलेवरंतत्रशिवलोकंसगच्छति॥२२॥ कुवेरतीर्थंतत्पूर्वंतत्रस्नात्वादिवंव्रजेत्॥ पश्चिमेसोमतीर्थ
स्यसूर्यतीर्थमितिस्मृतं॥२३॥ तत्रस्नात्वानरोयातिसूर्यलोकंनसंशयः॥ तत्पश्चिमेवारुणंतुतीर्थंपरमपावनं॥२४
तत्रस्नात्वानरोराजन्सर्वपापैःप्रमुच्यते॥ तत्पश्चिमेवायुतीर्थंत्रिषुलोकेषुविश्रुतं॥२५॥ तत्रस्नात्वावायुपीडानभवे
न्मनुजस्यहि॥ उत्तरेयमुनायास्तुगवांतीर्थंपरंस्मृतं॥२६॥ तत्रस्नात्वानरोयातिगोलोकंनात्रसंशयः॥ तत्पूर्वभागे
त्वदितितीर्थंलोकेप्रतिविश्रुतं॥२७॥ अदित्यायत्रवैतप्तंतपः परमपावनं॥ पुत्राणांपरमैश्वर्यंपुनर्यत्राप्तसापुरा॥२८
यत्रतेद्वादशादित्यादेवाइंद्रपुरोगमाः॥ उपासंतेसदादेवाप्रजापतिमकल्मषाः॥२९॥ तत्रस्नात्वादिवंयातिश्रियंमर्त्यो
भिगच्छति॥ तीर्थंनिरंजनंतत्रयत्रदेवाःसवासवाः॥३०॥ उपासंतेत्रसंध्यायांनित्यकालंयुधिष्ठिर॥ सेवंतेमुनयस्तत्रपुण्य
तीर्थंसहैवहि॥३१॥ भरद्वाजादयःसंतियत्रतत्परमंपदं॥ वेणीमाधवनाम्नाचयत्रविष्णुःसनातनः॥३२॥ तिष्ठत्यत्रदद

CC-0 Pulwama Collection. Digitized by eGangotri

प्र·म न्कामानंदर्शनादघहोनृणां॥ लोकानुग्रहमात्रेविरूपोविश्वरूपभाक्॥३३॥ यत्रसाविमलानाम्नालक्ष्मीः परमु
९४ पावनी॥ भक्तानामिष्टदानित्यंदर्शनात्सिद्धिदानृणां॥३४॥ तीर्थराजत्वमेतस्य प्रयागस्ययतः स्मृतं॥ तत्कारणंत्रयो
देवाब्रह्मविष्णुमहेश्वराः॥३५॥ अधिष्ठितास्ततोराजन् प्रयागंविद्धिपापहृत्॥ तीर्थानांपरमंतीर्थंसर्वतीर्थाश्रय
श्रये॥३६॥ तीर्थराजंसमाश्रित्यमुहूर्त्तंयातिसर्वशः॥ सर्वतीर्थेषुयत्पापंपापिनांयत्तुसंस्थितं॥३७॥ आवर्षंनि ष्कृति
स्तस्यमाघस्नानात्प्रजायते॥ श्रद्धानस्तत्रगत्वाराजन्स्नानंसमाचर॥३८॥ यानिचान्यानियत्रतीर्थानितुबहून्यपि॥ ए
कस्मिन्नपिचैतेषांस्नात्वावैत्रिदिवंव्रजेत्॥३९॥ प्राणांस्तत्रपरित्यज्यनभवेज्जन्मभाङ्नरः॥ गंगाचयमुनाचैवउभेतस्यफ
लेस्मृते॥४०॥ गुप्तयानुसरस्वत्यामीलितेजीवभूतया॥ ब्रह्मपुत्र्याऋषीणांतुतपसांफलभूतया॥४१॥ अतएवत्रिलो
कस्थैः प्रयागः सेव्यतेसदा॥ गंगात्रिपथगायत्रयमुनाचसरस्वती॥४२॥ यत्रसर्वेपितेदेवावेदाश्चऋषिभिः सह॥ति
ष्ठंतिसंश्रितानित्यंतन्माहात्म्यंतुकोर्हति॥४३॥ वक्तुंवर्षसहस्रेणशेषेणापिनशक्यते॥ ब्रह्मणापिकृतोयत्र अश्वमे
धामहामखाः॥४४॥ तस्यकुंडत्रयंतत्रवेदीमध्येप्रतिष्ठितं॥ प्रतिष्ठानमाहवनीयः प्रयागंगार्हपत्यकः॥४५॥ अलका
पुरमेवैतद्दक्षिणाग्निः स्मृतोबुधैः॥ तेषांमध्येसमायातागंगाचयमुनानदी॥४६॥ वेदीमध्येनवैदीप्तदिव्यरूपधरेन ९४
घे॥ यावदत्रस्थितंयच्च प्रत्येकमघहारितत्॥४७॥ सर्वेषांसंस्थितास्तत्रबहुनाकथनेनकिम्॥ यस्त्वेतत्कस्समुत्था

९३ सितंराज्यंतोपिताः पितरोयय ...नैः श्राद्धदानेश्चसंतानेनसर्वैरपि॥१५॥ प्रजाश्चपालितांसम्यक्सोपंवोमदनुग्रहः॥
दातुमिच्छामिपुत्रायराज्यंनिष्कंटकंत्विदं॥१६॥ गजवाजिरथोपेतंप्रभूतधनधान्यवत्॥ बलेनमहतायुक्तंमंत्रिणासम
तेनच॥१७॥ भवंतोप्यनुमोदध्वमस्मिन्नर्थेसमाहिताः॥ ब्राह्मणैः सहितोराजायत्करोतिनदाज्ञया॥१८॥ सर्वंसफ
लतांयातिमहत्कीर्तिंचविंदति॥ एवमुक्तास्तुमुनयोराजनंविनयान्वितं॥१९॥ प्रत्यूचुर्हृष्ट...सोमहाराजविधे
हितन्॥ अस्माभिर्यच्चवक्तव्यंस्वयमेवतथाकृतं॥२०॥ यच्चयास्त्वकर्तव्यमवशिष्टंचयत्त...मनसायत्नेप्र
यागगमनंप्रति॥२१॥ राज्यंपुत्रायदत्वाचप्रयागंगच्छसत्वरं॥ सम्यक्तीर्थेयात्रायाः स्वस्तिते सु...हितं॥२२॥ सिध्या
नांसाधयामोवैवयंचापिधनायते॥ इत्युक्त्वामुनयः सर्वेजग्मुश्चापियथागतं॥२३॥ अभिषिंच्यसुतंराज्येराजासोतः पुरस्ततः
प्रययौहर्षसंपन्नोनिरहंकृतिरात्मवान्॥२४॥ निर्मलोनिस्पृहः शांतोव्रतैः कृच्छ्रादिभिर्युतः॥ नित्यंत्रिषवणस्नायीतपः कृ
दकलेवरः॥२५॥ कालेननिधनंप्राप्तोराज्ञ्यश्चानुययुः पतिं॥ समानव्रतचारिण्यः पतिव्रतपरायणाः॥ ... प्रजापतिप
तिर्ब्रह्माविमानमधिरोप्यतं॥ निनायस्वपदंराजन्नानाभोगसमन्वितं॥२७॥ तेनवसार्द्धंतत्पत्न्योदिव्यादिव्यंपदंगताः य
वंप्रभावः कथितः प्रयागस्यमहाद्भुतः॥२८॥ प्रसंगतोपियंप्राप्यदुर्लभागतिराप्यते॥ एतत्तेक...सारव्यानंराजस
त्तम॥२९॥ इतिश्रीम॰ प्रया॰ षष्ठोध्यायः॥६॥ युधिष्ठिरउवाच॥ अघमर्षफलंजन्मअघमेनारितंवदते॥ प्रीतोस्म्यनुग्रहीतो

CC-0 Pulwama Collection. Digitized by eGangotri